ऽंसि जगत् प्रतीपान् । धर्मं महापुरुष ! पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम्” भाग० ७।६।३८ “कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः यतस्त्रिष्वेव युगेष्वाविर्भावात् स एवम्भूतस्त्वं त्रियुग इति प्रसिद्धः” श्रीधरस्वामी । २वसन्तादिकालत्रये । “या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा” यजु० १२।७५ “युगशब्दः कालवाची त्रयाणां युगानां समाहारस्त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि च । वेददी० ।

**त्रियूह** पुंस्त्री कपिलाश्वे हेमच० स्त्रियां ङीष् ।

**त्रिरात्र** न० तिसृणां रात्रीणां समाहारः अच् समा० । “अह्नाह्नान्ताः क्लीवे ड़मेदाः रात्रान्ताः प्रागसंख्यकाः” इत्यमरोक्तेः संख्यापूर्वत्वात् क्लीवता । १रात्रित्रये २तदुपलक्षिते दिनत्रये च । “उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम्” “अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्” मनुः । त्रिभिः रात्रिभिः निर्वृत्तम् ठञ् तस्य लुक् । तद्धितार्थद्विगुत्वात् अच् समा० । ३दिनत्रयोपवाससाध्ये व्रतभेदे न० । “एकरात्रं त्रिरात्रं वा षड्रात्रं वा विधीयते” प्रा० वि० धृतवचनम् । रात्रित्रयसाध्ये ४गर्गवेदादौ यज्ञभेदे पु० । “सहस्रदक्षिणे त्रिरात्रे” कात्या० श्रौ० १३।४।१५ । गर्गत्रिरात्रशब्दे २५४५पृ० दृश्यम् । [ शब्दे दृश्यम् ।

**त्रिरूप** पु० त्रीणि रूपाण्यस्य । अश्वमेधीये अश्वभेदे अश्वमेध-

**त्रिरेख** पु० तिस्रो रेखा यत्र । १शङ्खे हेमच० । समा० द्वि० । २रेखात्रये न० । [“त्रिलोनोऽष्टौ” छ० र० ।

**त्रिल** पु० त्रयो लाः लघुवर्णा यत्र । लघुवर्णयुक्ते नगणे

**त्रिलघु** त्रि० त्रयो लघवः यत्र । छन्दोग्रन्थप्रसिद्धे नगणे “त्रिलघुश्च नकारः” छन्दोम० । त्रिभिर्लघुः । २शुभलक्षणभेदान्विते स्थानत्रयह्रस्वे पुरुषे “त्रिपृथुत्रिलघुगम्भीर” इत्युद्दिश्य “ग्रीवाजङ्घामेहनैश्च त्रिभिर्ह्रस्वोऽयमीड़ितः” काशी०११अ० । ह०सं०६८अ० तु चतुर्ह्रस्वस्यैव शुभत्वमुक्तं यथा “ह्रस्वानि चत्वारि च लिङ्गपृष्ठं ग्रीवा च जङ्घे च हितप्रदानि” तत्र ह्रस्वे पृष्ठाधिक्यमिति भेदः ।

**त्रिलवण** न० त्रयाणां लवणानां समाहारः पात्रा० न ङीप् त्रिगुणितं लवणं वा संज्ञात्वात् कर्म० वा । “सैन्धवञ्च विड़ञ्चैव रुचकं च तृतीयकम् । मिलित्वैतत् त्रिलवणम्” इत्युक्ते लवणत्रये राजनि० ।

**त्रिलिङ्ग** त्रि० त्रीणि लिङ्गान्यस्य । १पुंस्त्र्यादिलिङ्गत्रययुक्ते शब्दे । समा० द्वि० ङीप् । २लिङ्गत्रये स्त्री “त्रिलिङ्ग्यां त्रिष्विति पदम्” अमरः । त्रीणि सत्वादीनि लिङ्गानि अनुमापकान्यस्य । ३अहङ्कारादौ त्रि० “रजःप्रधानान्महतस्त्रिलिङ्गो दैवनोदितात् जातः ससर्ज भूतादिर्वियदादीनि पञ्चशः” भाग०३।२०।१४ । ४वातादिधातुदोषजे रोगे च त्रि० सुश्रुतः ।

**त्रिलोकधृत्** पु० त्रयाणां लोकानां धृत् धृतिरस्य, धृ—सम्प० भावे क्विप् उत्तरपदद्विगुः । लोकत्रयस्यापतनानुकूलप्रयत्नविशेषरूपधारणाशालिनि परमेश्वरे “लोकस्वामी त्रिलोकधृत्” विष्णु स० ।

**त्रिलोकनाथ** पु० त्रयाणां लोकानां नाथः उत्तरपदद्विगुघटितस्तत्पुरुषः । त्रयाणां लोकानां नाथे परमेश्वरादौ । “त्रिलोकनाथेन सतां मखद्विषः” रघुः । “त्रिलोकनाथः पितृसद्मगोचरः” कुमा० । त्रिलोकपत्यादयोऽप्यत्र ।

**त्रिलोकात्मन्** पु० त्रयो लोकाः आत्मानः स्वरूपाणि यस्य कार्य्यकारणयोरभेदात् उत्तरपदद्विगुघटितस्तत्पुरुषो वा । १परमेश्वरे “त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः” विष्णु पु० ।

**त्रिलोकी** स्त्री त्रयाणां लोकानां समाहारः ङीप् । स्वर्गमर्त्यपातालरूपे लोकत्रये “यदि त्रिलोकी गणनापरा स्यात्” नैष० । “श्रियं त्रिलोकीतिलकः स एव” माघः ।

**त्रिलोकेश** पु० त्रयाणां लोकानामीशः उत्तरपदद्विगुघटितस्तत्पुरुषः । १परमेश्वरे “त्रिलोकात्मा त्रिलोकेशः” विष्णु० । २सूर्य्ये शब्दच० । त्रिलोकेश्वरादयोऽप्यत्र ।

**त्रिलोचन** पु० त्रीणि लोचनानि यस्य । १शिवे “त्रिलोचनैकांशतया दुरासदः” रघुः । “त्रिलोचनस्तामुपचक्रमे च” कुमा० । २काशीस्थे चतुर्दशमहालिङ्गान्तर्गते लिङ्गभेदे न० । “द्वितीयं च त्रिलोचनम्” ७५ अ० । तन्माहात्म्यं च तत्रैव दृश्यम् । २लोचनत्रययुक्ते त्रि० “मुखेन पूर्णेन्दुनिभस्त्रिलोचनः” माघः । ४दुर्गायां स्त्री । “लोचनत्रयसंयुक्ताम्” दुर्गाध्यानोक्तेः ।

**त्रिलोचनाष्टमी** स्त्री गौणचान्द्रज्यैष्ठकृष्णाष्टम्याम् “ज्यैष्ठेमासि नृपश्रेष्ठ ! कृष्णाष्टम्यां त्रिलोचनम् । यः पूजयति देवेशमीशलोकं स गच्छति” संवत्सरकौमुदीधृतभविष्यपुराणम् । “ज्यैष्ठे मास्यसिते पक्षे अष्टम्याञ्च महेश्वरि ! । शिवार्च्चने च तल्लोकं लभते नात्र संशयः” उत्तरकामाख्यातन्त्रे ११ पटले ।

**त्रिलौहक** त्रि० त्रीणि लौहानि धातवो यत्र कप्संज्ञायां कन् वा । सुवर्णरजतताम्रमये पात्रादौ ।